# Shantidharmakritam Agni Stotram

# શાન્તિધર્મકૃતં અગ્નિસ્તોત્રમ્

## Document Information

Text title : Shantidharmakritam Agni Stotram

File name : shAntidharmakRRitaMagnistotram.itx

Category : deities_misc, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_deities_misc

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 3 | adhyAya 158/21-36||

Latest update : April 12, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 12, 2026

*sanskritdocuments.org*

# શાન્તિધર્મકૃતં અગ્નિસ્તોત્રમ્

કર્તવ્યોઽત્ર મયા સોઽયં ધર્મોઽત્ર પ્રથમો મમ ।
વિચાર્યેત્થં સ મતિમાન્ વહ્નિસ્તોત્રં જગૌ તદા ॥ ૨૧॥

શરણં પાવકં ગત્વા ત્વેકચિત્તઃ સ્તવં વ્યધાત્ ।
“ૐ નમોઽનન્તશક્ત્યુગ્રશક્ત્યાત્મને હરેઃ પ્રભોઃ ॥ ૨૨॥

ૐ નમઃ સર્વલોકાનાં મખસાધનમૂર્તયે ।
એકદ્વિપઞ્ચધિષ્ણ્યાય રાજસૂયે ષડાત્મને ॥ ૨૩॥

પ્રત્યક્ષદેવરૂપાય નમસ્તે દેવવૃત્તયે ।
સર્વવર્ષ્મવતાં શુક્રરૂપાય બલિને નમઃ ॥ ૨૪॥

ત્વં મુખં સર્વદેવાનામીશ્વરાણાં હરેરપિ ।
ત્વં પાકઃ સર્વભૂતાનામન્નાનાં રસિનાં તથા ॥ ૨૫॥

હુતં હવિર્ભક્ષયઁસ્ત્વં મેઘત્વાય કરોષિ વૈ ।
વૃષ્ટિરૂપં તુ તદ્ભૂત્વૌષધિવ્રાતાન્ પ્રપુષ્યતિ ॥ ૨૬॥

તત્ફલાદ્યૈર્ભૂતવાસાઃ સુખં જીવન્તિ જન્તવઃ ।
તત્સમિદ્ભિર્જના યજ્ઞાન્ પ્રકુર્વન્તિ સુરા અપિ ॥ ૨૭॥

દૈત્યાશ્ચ રાક્ષસાશ્ચાપિ ત્વદાધારા વિભાવસો ।
જરાયુજાશ્ચાણ્ડજાશ્ચ સ્વેદજા ભૂમિજા અપિ ॥ ૨૮॥

આપ્યાયન્તે ત્વયા સર્વે સંવૃધ્યન્તે ત્વયાઽનલ ।
સંરક્ષ્યન્તે ત્વયા સર્વે તથા માં પરિરક્ષય ॥ ૨૯॥

દેવેષુ તૈજસત્ત્વં વૈ કાન્તિ સિદ્ધેષુ વૈ ભવાન્ ।
વિષં નાગેષુ ચાસ્સે ત્વં વાયુભાગઃ પતત્રિષુ ॥ ૩૦॥

મનુજેષુ પશુપક્ષિગણે ક્રોધો ભવાનપિ ।
અવષ્ટમ્ભશ્ચ તરુષુ કાઠિન્યં ત્વં ક્ષિતાવપિ ॥ ૩૧॥

જલે દ્રવો ભવાનેવ જવો ભવાન્ હિ વાયુષુ ।
વ્યાપકસ્ત્વં નભસ્યેવ સર્વમ્ભૂતાન્તરસ્થિતઃ ॥ ૩૨॥

ત્વમેકસ્ત્રિવિધશ્ચાપ્યષ્ટધા સહસ્રધાપિ ચ ।
સ્વાહાસ્વધાદિભિર્ભોક્તા હવ્યકવ્યસ્ય વૈ ભવાન્ ॥ ૩૩॥

હેતિષ્વાપિ ભવાનેવ ધારાસુ સંવિરાજતે ।
જાતવેદો નમસ્તુભ્યં પિઙ્ગાક્ષ તે નમોઽસ્તુ ચ ॥ ૩૪॥

હુતાશન નમસ્તેઽસ્તુ નમસ્તે હવ્યવાહન ।
પાવકાઽથ નમસ્તેઽસ્તુ નમસ્તે વિશ્વપાવક ॥ ૩૫॥

પાકકર્તર્નમસ્તેઽસ્તુ પોષ્ટસ્તે ચ નમો નમઃ ।
ત્વં જ્યોતિસ્ત્વં મહાદિત્યો વિભાવસો નમોઽસ્તુ તે ॥ ૩૬॥

હિરણ્યરેતા વહ્નિસ્ત્વં સપ્તજિહ્વ નમોઽસ્તુ તે ।

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાઃ દ્વાપરયુગસન્તાનાત્મકસ્ય તૃતીયખણ્ડે
૧૫૮-અધ્યાયાન્તર્ગતં શાન્તિધર્મકૃતં અગ્નિસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૩। અધ્યાય ૧૫૮/૨૧-૩૬॥

lakShmInArAyaNIyasaMhitA . khaNDa 3. adhyAya 158/21-36..

Proofread by PSA Easwaran

*Shantidharmakritam Agni Stotram*

pdf was typeset on April 12, 2026

Please send corrections to *sanskrit@cheerful.com*